४३४
॥ अथोत्तरगीता प्रारंभः ॥
१
Acc. No :- M1080
Title :- उत्तरगीता (महाभारत)
Author :- व्यास
Subject :- वेदान्त
पेज - 15
KKSU LIBRARY RAMTEK 441 106 M1080 Dist. Nagpur
Checked 2012

श्रीगणेशाय नमः। अर्जुन उवाच। यदेकं निष्कलं ब्रह्म व्योमा
तीतं निरंजनं। निर्मलं परमं दिव्यं मप्रमेयमनुत्तमं।१। अप्रतर्क्य
मविज्ञेयं विनाशोत्पत्तिवर्जितं। कैवल्यं केवलं शांतं शुद्धमत्यं
तनिर्मलं।२। कारणं योगिनिर्मुक्तं हेतुसाधनवर्जितं। नीवाश
यस्थितं सूक्ष्मं ज्ञानं ज्ञेयं स्वरूपिणं।३। निर्गुणं परमं गुह्यं मिच्चा
मिन्नसमप्रभं। तत्सर्वं देव मुख्यं ते विज्ञाने ब्रूहि केशव।४। श्री
भगवानुवाच। साधु पार्थ महाबाहो बुद्धिमानसि पांडव। यन्मां
पृच्छसि तत्त्वार्थं मनोऽशं प्रवदाम्यहं।५। आत्ममंत्रस्य हंसस्य पर

स्परसमाश्रयः। योगेन गतकामानां भावना चैवमेव च।६। शरी
रिणामजस्यास्य हंस इत्यपद ह स्यते। सोहं कृत्वाक्षरं चैव कुटस्थम
चलं ध्रुवं।७। पिंडे मुक्तो पदे मुक्तो रूपे मुक्तो णाडानना। रूपातीतः
स्वयं मुक्तो तेमुक्तो नात्र संशयः।८। तद्विद्वान् अक्षरं प्राप्य त्यजेन्म
रणजन्मनि। स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः।९।
काकिमुखं ककारांतं मकारश्चेतनाकृतिः। अकारस्य त्रयं कु
सोऽस्ति कोऽर्थः संप्रतिपद्यते।१०। यावत्सदृश्येत्तगाकारं तदा त्व
रं बिचिंतयेत्। खं मध्ये च प्रवेष्टव्यं। खं च ब्रह्म सनातनं।

११।खंमध्येकुरुचात्मानंआत्ममध्येचखंकुरु।आत्मानंखमयंकृ
त्वानकिंचिदपिचिंतयेत्।१२।बहिर्व्योमास्थितंनित्यंनासाग्रेच
व्यवस्थितंनिर्मलंतद्विजानीयात्षडूर्मिरहितंशिवं।१३।अना
हतंत्यमनःशून्यंबुद्धिशून्यंनिरामयं।सर्वशून्यंनिराभासंस
माधिःस्थस्यलक्षणं।१४।ऊर्ध्वशून्यमधःशून्यंमध्यशून्यंनि
रामयं।त्रिशून्यंयोविजानातिसोपिमुच्येतबंधनात्।१५।आमा
त्रंशब्दरहितंस्वरव्यंजनवर्जितं।बिंदुनादकलातीतंयस्तंवे
दसवेदवित्।१६।प्राप्तेज्ञानेचविज्ञानेज्ञेयेचहृदिसंस्थिते।
लब्धशांतिपदेदेहेनयोगोनचधारणात्।१७।योवेदादौस्वरः

ओंकारोवेदांतेचप्रतिष्ठितः।तस्यप्रकृतिलीनस्ययःपरःसम
हेश्वरः।१८।नावार्थीमज्जतेनावेयावत्पारंनगच्छति।उत्ती
र्यचपरेपारेनावायाःकिंप्रयोजनं।१९।ग्रंथमभ्यस्यमेधावि
ज्ञानविज्ञानतत्परः।पलालमिवधान्यार्थीत्यजेत्ग्रंथम
नेकधा।२०।उल्काहस्तोयथाकाष्ठंद्रव्यमालोक्यतांत्यजेत्।
ज्ञानेनज्ञेयमालोक्यपश्चात्ज्ञानंपरित्यजेत्।२१।यथामृ
तस्यतृप्तस्यपयसाकिंप्रयोजनं।ज्ञानामृतेनतृप्तस्यकृ
तकृत्यस्ययोगिनः।२२।नेवास्तिकिंचित्कर्तव्यमस्तिचे
न्नसतत्त्ववित्।तैलधारमिवाच्छिन्नदीर्घघंटानिनादवत्।२३

अमारत्नं प्रणवं स्यात् ग्रंथरत्नं वेद स वेदवित्। आत्मानमर
णिं कृत्वा प्रणवं चोत्तरारणिं।२४। ध्याननिर्मथनाभ्यासाद्दे
वं पश्येन्निगूढवत्। विधूमाग्निनिभं देवं पश्येदत्यंतनिर्मलं।
२५। तादृशं परमं रूपं स्मरेत्पार्थ मनन्यभाक्। दूरस्थोपि न
दूरस्थं पिंडब्रह्मांडवर्जितं।२६। अमलं सर्वदा देहि सर्वव्यापि
निरंजनं। कायस्थोपि न कायस्थो कायस्थोपि न जायते।२७
कायस्थोपि न भुंजामि कायस्थोपि न बध्यते। तिलमध्ये य
था तैलं क्षीरमध्ये घृतं यथा।२८। पुष्पमध्ये यथा गंधं
फलमध्ये यथा रसं। काष्ठाग्निवत्प्रकाशेन आकाशे वायुसं

चरन्।२९। तथा सर्वगतो देही देहमध्ये व्यवस्थितः। मनस्थो
देहिनो देवो मनमध्ये व्यवस्थितं।३०। यावत्पश्येत्खगाकारं
तदाकारं विचिंतयेत्। मनस्थं मनमध्यस्थं मनस्थं मनव
र्जितं।३१। मनसा मन आलोक्य स्वयं सिद्धंति योगिनः। आका
शं मानसं कृत्वा मनः कृत्वा निरास्पदं। निश्चलं तद्विजानीया
त् समाधिस्थस्य लक्षणं। सर्वं शून्यं तदात्मेति समाधि
स्थस्य लक्षणं। शून्यभावितभावात्मा पुण्यपापैः प्रमुच्यते।
अर्जुन उवाच। अदृश्यभावना नास्ति दृश्यमानो विनश्यति।३४।

४

अवर्णमीश्वरं अस्तु कथं ध्यायंति योगिनः। श्रीभगवानुवाच। ऊर्ध्वपूर्ण
मधः पूर्णं मध्यपूर्णं तदात्मकं। ३५। सर्वपूर्णं तिदात्मेति समाधिस्थस्य
लक्षणं। अर्जुन उवाच। सालंबस्याप्यनित्यत्वं निरालंबस्य शून्यतां उभ
योरपि दोषापि कथं ध्यायंति योगिनः। श्रीभगवानुवाच। हृदयं निर्म
लं कृत्वा चिंतइत्वा मनामयं। ३७। अहमेवमिदं सर्वमिति पश्येत्परं सु
खं। अर्जुन उवाच। अक्षराणि च मात्राणि सर्वे बिंदुसमाश्रिताः। ३८।
बिंदुना भिद्यते नादेन स नादः केन भिद्यते। श्रीभगवानुवाच। अनाह
तस्य शब्दस्य तस्य शब्दस्य चा ध्वनिः। ३९। ध्वनिरंतर्गतं ज्योतिः ज्यो
तिरंतर्गतं मनः। तन्मनो विलयं याति तद्विष्णोः परमं पदं। ४०। यएवं

४

दृश्यते ज्ञानी पुण्यपापैर्न लिप्यते ॐकारध्वनिनादेन वायुः संहरणांति
के। ४१। निरालंबं समुद्दिश्य यत्र नादो लयं गतः। अर्जुन उवाच। भिन्ने
पंचात्मके देहे पंचानां पंच आगतिः। ४२। प्राणैर्विमुक्ते देहस्य धर्माध
र्मौ क्व गच्छतिः। श्रीभगवानुवाच। धर्माधर्मौ मनश्चैव पंच भूतानि
चानिलः। ४३। इंद्रियाणि च पंचैते ये चान्ये पंच देवताः। तथैव मनसा
सर्वे नित्यमेवाभिमानिनः। ४४। जीवेन सह गच्छंति यावत्तत्वं न विं
दति। अर्जुन उवाच। स्थावरं जंगमं वापि यत्किंचित्सचराचरं। ४५।
जीवजीवेन जीवंति स जीवः केन जीवति। श्रीभगवानुवाच। मुखनासिक
योर्मध्ये प्राणः संचरते यदि। आकाशं विबले प्राणं स जीवस्तेन जीवति। ४६।

5

अर्जुन उवाच। ब्रह्मांडव्यापितं व्योम व्योम्नं च वेष्टितं जगत्। अंतर्बहि
स्थितं व्योम कथं ध्यायंति योगिनः॥४७। श्रीभगवानुवाच। आकाशा
द्यवकाशस्य दाकाशं व्यापितं जगत्। आकाशस्य गुणः शब्दो निःश
ब्दो ब्रह्म उच्यते।४८। अर्जुन उवाच। दंतोष्ठतालुजिह्वानां यत्र यत्र
दृश्यते। अक्षरत्वं कुतस्तेषां क्षरत्वं वर्त्तते सदा।४९। श्रीभगवानु
वाच। अघोषमव्यंजनमस्वरं च अतालुकंठोष्ठमनासिकं चाद्विरे
फजातं क्षर सूक्ष्म वर्जितं तदक्षरं न क्षरते कदाचित्।५०। अर्जुन
उवाच। इंद्रियाणां निरोधेन देहे नश्यति भारत। देहे नष्टे कुतो बुद्धि
र्बुद्धि नष्टे कुतो ज्ञता।५१। श्रीभगवानुवाच। तावद्देहनिरोधस्य या

वत्तत्त्वं न विंदति। विदिते तु परे तत्त्वे एकमेवानुपश्यति।५२। अर्जु
न उवाच। नवछिद्रपुरे देहे स्रवंति घटिका इव। येवं बाह्येन शुध्यं
ति पुमान् ब्रह्मापि विंदति।५३। अत्यंतमलिनो देहो देही चात्यंतनि
र्मलः। उभयोरंतरं ज्ञात्वा कस्य शौचं विधीयते।५४। ॐ तत्सदिति
श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जु
नसंवादे श्रीमहाभारते अश्वमेधपर्वणि शतसाहस्र्यां संहिता
यां वैयासिक्यां ज्ञानवर्णनं नाम प्रथमोध्यायः।१। अर्जुन उवा
च। ज्ञात्वा सर्वगतं ब्रह्म सर्वज्ञं परमेश्वरं। अहं ब्रह्मेति निर्दि
ष्टं प्रमाणं तत्र किं भवेत्।१। श्रीभगवानुवाच। यथा जले जलं क्षि

स्थं क्षीरं क्षीरं घृते घृतं। अविशेषो भवेत्तद्वत् जीवात्मपरमात्मने।२।
जीवः परेणात्मना तत्त्वं सर्वगं ज्योतिरीश्वरं। प्रमाणं लक्षणं ज्ञेयं स्वय
मेकाग्रमेव स्वयं।३। ज्ञानात्संभवते ज्ञेयं विदितं ज्ञानमेव तु। ज्ञा
नमात्रेण मुच्यते किं पुनर्योगधारणात्।४। ज्ञानेन दीपिते देहे बु
द्धिर्ब्रह्मसमाधिना। ब्रह्मज्ञानाग्निना नित्यं दहते पुण्यपापयोः।५।
अतः पवित्रं परमेश्वराख्यमद्वैतरूपं विमलांबराभं। यथो
दके तोयमनुप्रविष्टं तदात्मरूपं निरुपाधिसंस्थं।६। आकाश
वत्सूक्ष्मशरीरमात्मा न दृश्यते वायुरिवांतरात्मा। स बा
ह्यमभ्यंतरनिश्चलात्मा ज्ञानोल्कया पश्यति चांतरात्मा।७। यत्र

यत्र मृतो ज्ञानी येन केनापि मृत्युना। यथा सर्वगतं व्योम तत्र तत्र ल
यं गतः।८। शरीरं व्यापितं येन भुवनानि चतुर्दश। निश्चलो विम
लो देही सर्वव्यापि निरंजनः।९। मुहूर्तमपि यो गच्छेन्नासाग्रे म
नसा अपि। सर्वं तरति पाप्मानं कृतं जन्मांतरैरपि।१०। दक्षे पिं
गला नाडि सूर्यमंडलगोचरा। पितृयानमिति ज्ञेयं बुद्धिः कर्मानु
सारिणी।११। इडा च वाम निश्वासा चंद्रमंडलगोचरा। मातृयानमि
ति ज्ञेयं तत्सर्वं ज्ञानिनो हृदि।१२। गुदस्य पृष्ठभागेस्मिन् वीणादंड
स्य देहभृत्। दीर्घास्थि मूर्ध्निपर्यंतं ब्रह्मदंडेति कथ्यते।१३। तस्यां
ते सुषिरं सूक्ष्मं ब्रह्मनाडीति कथ्यते। इडापिंगलयोर्मध्ये सुषुम्ना अग्नि

मंडले।१४। सर्वं प्रतिष्ठितं तस्मिन् सर्वगं विश्वतोमुखं। तस्मिन्म
ध्यगतः सूर्यो सोमाग्निपरमेश्वरौ।१५। भूतलोकाः दिशाः क्षेत्राः स
मुद्राः पर्वताश्चलाः। द्वीपाश्च निम्नगा वेदाः शास्त्रविद्याकलाक्षराः।
१६ स्वरा मात्रापुराणानि गुणान्यन्यानि सर्वशः। बीजं जीवात्मन ७
स्तेषां क्षेत्रज्ञः प्राणवाहकः।१७। सुषुम्नांतर्गतं तस्मिन्देहके
दप्रतिष्ठितं। नानानाडीप्रसवगं सर्वभूतांतरात्मनि।१८। ऊ
र्ध्वमूलमधःशाखा वायुमार्गेण सर्वगः। द्विसप्ततिसहस्राणि
नाड्यस्तु वायुगोचराः।१९। कर्ममार्गाणास कलास्ते ये स्याःसु
षिरात्मकाः। अथ चोर्ध्वगानस्तेषां सर्वद्वाराणि शोधयेत्।२०।

वायुना सह जीवानां ज्ञानमोक्षमवाप्नुयात्। अमरावतिलोके
स्मिन्मुखाग्रे पूर्वतो दिशि।२१। अग्निलोकमविज्ञेयं चक्षु
स्तेजोवतिपुरः। याम्यासे यमनीश्रोत्रोयमलोकः प्रतिष्ठितः।२२।
नैर्ऋत्यो भयपार्श्वपिकौ बेरिलोकमाश्रितः। विभावतिप्रतीच्यां
च पृष्ठावारुणिकापुरि।२३। वामेगंधवती कर्णे वायुलोकप्र
तिष्ठितं। सोमपुष्पवतीज्ञेया चंद्रलोकप्रतिष्ठितः।२४। वामक
र्णेतु विज्ञेयं देहमाश्रित्य तिष्ठति। वामचक्षु शिवश्चैव शिव
लोकमनोन्मनी।२५। मूर्ध्नि ब्रह्मपरी ज्ञेया ब्रह्मांडे देहमाश्रितः।
पादस्थः शिवोनंतो कालाग्निप्रलयांतकः।२६। अनामयम

यः स्थो धर्ममध्यमं तं वन्हि संस्थितं। अधः पादतलं विद्यात्पातालं
वितलं भवेत्। २६। अतलं पादसंधिस्थं सुतलं जंघमुच्यते। २ सा
लं च जानुभ्यां तु रूदेशे महातलं। २८। कटिस्थलं तलं प्रोक्तं सप्त
पातालसंज्ञितं। पातालो नाम ध्यो महत्लं भोगितत्फणि मंडितं। २९।
चेष्टते सर्वभूतानां तः सर्वे च हृदि संस्थितं। नकलौ कोनाभिदेशे तु भु
वर्लोकं च कुक्षसि। ३०। हृदये स्वर्लोकस्तु सूर्यादिग्रहपर्ययातु।
सूर्यसोमनक्षत्रबुधगुरुकुजोगिराः। ३१। मंदसप्तर्षि
ध्रुवयाध्रुवोतः सर्वलोकप्रकाशकः। हृदये कल्पितो देहे तस्मिन्स
र्वस्तु रवाच्यहं। ३२। वक्षस्याद्धिमहर्लोकाजनलोकस्तु कंठके।

८

तपोलोकं भ्रुवोर्मध्ये मूर्ध्नि सत्यं प्रतिष्ठितं। ३३। एवं ब्रह्मांड निलयं
तस्मिन्देहे प्रतिष्ठितं। ब्रह्मांडेनावृतं लोकं अंडमध्ये प्रतिष्ठितं। ३४।
ब्रह्मांडव्यापिनी पृथ्वी तोयमध्ये विलीयते। अग्निनापिबते तोयं
वायुरग्निं ग्रसेध्रुवं। ३५। आकाशोपिबते वायुमनसाकाशमेव च।
बुध्याहंकारश्चित्तं च क्षेत्रज्ञं परमात्मनि। ३६। तुर्यं च तुर्यातीतं च
शिवस्थान्नमनामयं। स्वस्व समस्तमात्मानं ध्यायते परमात्मनि।
३७। अहं ब्रह्मेति मां ध्यायेदेकाग्रकलमानसः। सर्वत्रैरेतिपा
प्मानं कल्मषकोटिशतैरपि। ३८। घटसंवृत्तमाकाशं लीयमाने
घटेयथा। घटोनश्यति नाकाशं तद्वत्जीवरिवात्मनि। ३९। घटाका

ग्रामिवात्मानं विलयं यातित्तत्वतः। स गच्छति शिवात्मत्वं ज्ञान
लोकेन संशयः।४०। तुलसंवर्णसहस्राणि मेकपादस्थितो नरः।
एकेन ध्यानयोगेन कलां नार्हति षोडशीं।४१। ब्रह्महत्यासहस्राणि
वीरहत्याशतानि च। एकेन ध्यानयोगेन दहत्यग्निरिवेंधनं।४२।
अश्वमेधसहस्राणि वाजपेयशतानि च। एकेन ध्यानयोगेन क-
लां नार्हति षोडशीं।४३। अनेककर्मशौचं च जपयज्ञस्तथैव
चा वेदाध्ययनतीर्थानि यावत्तत्वं न विंदति।४४। तावद्भ्रम-
ति संसारे यावत्तत्वं न विंदति। विदिते तु परे तत्त्वे एकमेवानु-
पश्यति।४५। अहं ब्रह्मेति वाक्यमक्षरद्वयमात्मनः। स्वय

मुक्तिरिति येन ब्रह्मतत्त्वं न संशयः।४६। चतुर्वेदविदो विप्रो
सूक्ष्मब्रह्म न विंदति। वेदभारभराक्रांतः सोपि ब्रह्मणगर्द-
भः।४७। पठिता चतुरो वेदा धर्मशास्त्रमनेकधा। नाहं ब्रह्मे-
ति यो विंद्यात् दर्वी पाकरसं यथा।४८। यथा खरश्चंदनभार-
वाही भारस्य वेत्ता न तु चंदनस्य। एवं हि विप्रो वेदशास्त्रपूर्ण-
ज्ञानेन हीनो खरवद्वहंति।४९। आहारनिद्राभयमैथुनं च
सामान्यमेतत्पशुभिर्नराणां। ज्ञानं नराणामधिको विशे-
षो ज्ञानेन हीनाः पशुभिः समानाः।५०। प्रातर्मूत्रपुरीषाभ्यां

मध्यान्हे स्तुस्थिप्रासयोः। स्तसाकामेनजध्यं तेजं तबानिनि
द्रया। ५१। नादबिंदुसहस्राणि कोटिबिंदुशतानि च। सर्वं त
द्भस्तणिकुलं यो विंदति निरामयं। ५२। गवामनेकवर्णानां क्षी
रस्याप्येकवर्णता। क्षीरवत्पश्यती ज्ञानी लिंगं नलु गवां यथा।
५३। द्विपध्ये दं बद्धमोक्षाय निर्ममेति ममेति च। ममेति बध्य
तेजंतु निर्ममेतिप्र मुच्यते। ५४। मनसो ह्युन्मनीभावो द्वै
तं नैवोपलिप्यते। यत्रयत्र मनो भाति तत्र तत्र परं पदं। ५५।
हन्यामुष्टिभिराकाशं क्षुधार्थी कंडयेत्तुषां। अहंतत्ते

नजानाति तस्य मुक्तिर्न जायते। ५६। ॐ तत्सदिति श्रीम
दुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा
र्जुनसंवादे श्रीमहाभारते अश्वमेधपर्वणि शतसाहस्र्यां
संहितायां वैय्यासिक्यां ब्रह्मोपदेशो नाम द्वितीयोध्यायः। २।
श्रीभगवानुवाच। अनंतशास्त्रं बहु वेदितव्यमल्पश्च का
लो बहवश्च विघ्नाः। यत्सारभूतं तदुपासितव्यं हंसो यथा
क्षीरमिवांबुमिश्रं। १। पुराणं भारतं वेदं शास्त्राणि विविधा
नि च। पुत्रदारादि संसारो योगाभ्यासस्य विघ्नकृत्। २। इदं ज्ञा

नमिदं ज्ञेयं यत्सर्वं ज्ञातुमिच्छति। अपिवर्षसहस्त्राणि शा
स्त्रांतं नाधिगछति।३। विज्ञायाक्षरतन्मात्रं जीवितं चापि
चंचलं। विहाय शास्त्रजालानि यत्सत्यं तत्समाचरेत्।४।
पृथिव्यादिनि भूतानि जिह्वोपस्थनिमित्तकं। जिह्वोपस्थ
परित्यागी पृथिव्याः किं प्रयोजनं।५। तीर्थानि तोयपूर्णानि
देवाः पाषाणमृण्मयाः। योगिनो न प्रपद्यंते आत्मज्ञानपरा
यणाः।६। अग्निर्देवो द्विजातीनां मुनीनां हृदि संस्थितः। प्र
तिमा स्वल्पबुद्धीनां सर्वत्र विदितात्मनां।७। सर्वत्रावस्थि

११

तं शांतं न पश्यंति जनार्दनं। ज्ञानचक्षुर्विहीनस्य अंधः सू
र्यमिवोदितं।८। ध्यानी पश्यंति देहेषु निर्मलं गगनोपमं। य
त्र यत्र मनो याति तत्र तत्र परं पदं।९। तत्र तत्र परंब्रह्म सर्व
रूपमिदं स्थितं। दृश्यतां दृश्यरूपाणि गगनस्येव निर्मलं।
१०। अहं ब्रह्मेति यत्सर्वं विजानाति नरः सदा। हत्वापि स
कलांल्लोकान् सर्वांत्राः सर्वआफलिः।११। अहमेवा
क्षरं ब्रह्म परमं विष्णुमव्ययं। दृश्यते तु यदाकारं तदाकारं
विचिंतयेत्।१२। आत्ममध्ये गगनाकारं गगमध्ये आत्मरूपकं।

10

दद्यात् मैक्ष्यं दद्यात्पुनर्न्नलं। तद्भैक्ष्यं मेरुना तुल्यं जलं सागरोपमं।२५। यतिर्यस्य गृहे भुंक्ते तस्मिन्भुंक्ते हरिः स्वयं। हरिर्यस्य गृहे भुंक्ते तस्मिन्भुंक्ते जगत्त्रयं।२६। अहिमिव जन योगी सर्वदा वर्जयिद्यः कुणपमिव च नारिं त्यक्तकामो विरागी। विषमिव विषयान्हि मन्यमानो दुरंतं जयति परमहंसो मुक्तिभावं समेति।२७। यथाग्निः सर्वरसान् भुंक्ते हुताग्निर्न च्यापि हि सर्वभक्षः। तथैव योगी विषयान् भुंक्ते न लिप्यते कर्मशुभाशुभानि।२८। ध्यानेन योगाग्निसमिंधनेन

पंचात्मकं कर्मगुणौंधनेन। ज्ञानाग्निना वायुसमन्वितेन दग्धं युगांते सह कर्मबंधो।२९। ब्रह्म मे दोनज्ञानाति तस्य मुक्तिर्न जायते। समानेसर्वजंतूनां ब्रह्मनस्सोभेण कथ्यते।३०। ज्वलितं तु निभाकारं ब्रह्म सत्त्वं निजोत्कलि।३१। चित्तं निर्मलं शांतं निश्चितं स्थिरवर्जितं।३२। सर्वचिंता विनिर्मुक्तं निश्चितं विमलं भवेत्। स योगी ब्रह्म निर्वाणे कमले नात्र संशयः।३३। इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रीमहाभारते अश्वमेधपर्वणि गोपालसाह

१३

त्र संहितायां वैय्यासिक्यां आत्मउपदेशो नाम त्रितीयोध्यायः ॥ ३

श्री ॥ कृष्णार्पणमस्तु ॥ शुभमस्तु ॥ रामदास ॥

१४